








श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री द्वादशनाम पञ्जर स्तोत्रम्

***shrI dvAdashanAma pa~njaram***

# श्री द्वादशनाम पञ्जर स्तोत्रम्

पुरस्तात् केशवः पातु चक्री जाम्बूनद प्रभः । पश्चान् नारायणः शंखी नीलजीमूत सन्निभः ॥ [1]

इन्दीवरदळ श्यामो माधवोर्ध्वं गदाधरः । गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥ [2]

उत्तरे हलभृद् विष्णुः पद्म किञ्जल्क सन्निभः । आग्नेय्याम् अरविन्दाभो मुसली मधुसूदनः ॥ [3]

त्रिविक्रमः खड्गपाणिर्-निरृत्यां ज्वलन प्रभः । वायव्यां वामनो वज्री तरुणादित्य दीप्तिमान् ॥ [4]

ऐशान्यां पुण्डरीकाक्षः श्रीधरः पट्टसायुधः । विद्युत्प्रभो हृषीकेशो ह्यवाच्यां दिशि मुद्गरी ॥ [5]

हृत्पद्मे पद्मनाभो मे सहस्रार्क सम प्रभः । सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः ॥ [6]

इन्द्रगोपक संकाशः पाशहस्तोऽपराजितः । स बाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥ [7]

एवं सर्वत्र मच्छिद्रं नाम द्वादश पञ्जरम् । प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन ॥ [8]

**भयन्नास्ति कदाचन ओं नम इति ॥**

ओं आपदामप हर्तारं दातारं सर्वसंपदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ [9]

आर्तानाम् आर्तिहन्तारं भीतानां भीतिनाशनम् । द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥ [10]

नमः कोदण्डहस्ताय सन्धीकृत शराय च । खण्डिताखिल दैत्याय रामायाऽपन् निवारिणे ॥ [11]

रामाय राम भद्राय रामचन्द्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥ [12]

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ । आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ॥ [13]

# श्री द्वादशनाम पञ्जर स्तोत्रम्

सन्नद्धः कवची खड्गी चापबाणधरो युवा । गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ [14]

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् । नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥[15]

सत्यं सत्यं पुनस्सत्य मुद्धृत्य भुजमुच्यते । वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम् ॥ [16]

शरीरे जर्झरी भूते व्याधि ग्रस्ते कलेबरे । औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥ [17]

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥ [18]

कायेन वाचा मनसेन्द्रियैर्वा - बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै - श्रीमन्नारायणायेति समर्पयामि ॥

यदक्षर पदभ्रष्टं मात्राहीनन् तु यद्भवेत् । तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

विसर्ग बिन्दु मात्राणि पदपादाक्षराणि च । न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥